International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2018; 4(4): 129-133
© 2018 IJSR
www.anantaajournal.com
Received: 12-05-2018
Accepted: 17-06-2018

**राजिन्द्रा शर्मा**
शोधनिर्देशिका, हिमाचल प्रदेश विश्वविद्यालयः, शिमला, हिमाचल प्रदेश, भारत

**सुशीलः नेगी**
अनुसन्धाता, हिमाचल प्रदेश विश्वविद्यालयः, शिमला, हिमाचल प्रदेश, भारत

**Correspondence**
**राजिन्द्रा शर्मा**
शोधनिर्देशिका, हिमाचल प्रदेश विश्वविद्यालयः, शिमला, हिमाचल प्रदेश, भारत

# नैष्कर्म्यसिद्धेः प्रथम अध्याये वर्णितज्ञानमेव मोक्षसाधनमिति सिद्धान्तसिद्धिः

**राजिन्द्रा शर्मा, सुशीलः नेगी**

**प्रस्तावना**

वेदान्तशास्त्रोद्घोषोऽस्ति यज्ज्ञानादेव मोक्षः। तत्र ज्ञानाज्ञानं विस्तरेण निरूपितम्। शास्त्रे-ऽस्मिन् अज्ञानाविद्यामायाऽवस्तूनि पर्यायशब्दाः। वेदान्तसारे सदानन्दयोगीन्द्रोऽज्ञानं निरू-पणीयमनिरूपणीयमिति सिद्धान्तद्वयमुपस्थापति- अज्ञानं सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपम् [1]....... सुरेश्वराचार्योऽपि ज्ञानविरोध्यज्ञानमिति प्रत्यपादयत्।

पुनश्च शास्त्रेषु ज्ञानाज्ञानयोर्विशदवर्णनमुपलभ्यते। आचार्ययास्केन प्रतिपादितम्- अथ ज्ञान प्रशंसा भवति अज्ञाननिन्दा च [2]। उपनिषत्स्वपि प्रायो ज्ञानकर्मविवेचनानि लभन्ते। तत्र ज्ञानकर्ममार्गयोर्विवेचनमस्ति, श्रीमद्भगवद्गीतायाम प्ये- तन्मार्गविवेचनं भगवता कृतम्। तत्राऽऽचार्यशङ्कर ईशावास्यमिति मन्त्रे ज्ञानमार्गं वर्णयति, कुर्वन्नेवेहेति मन्त्रे कर्ममार्गं च वर्णयति। तौ च मन्त्रावित्थम्-

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम् [3]॥

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे [4]॥

आचार्यशङ्करेणोपरोक्तयोर्मन्त्रयोर्यथाक्रमं ज्ञानकर्मणी विवेचिते- अत्राद्येन मन्त्रेण सर्वेषणापरित्यागेन ज्ञाननिष्ठोक्ता प्रथमो वेदार्थः, ईशावास्यमिदं सर्वं ... मा गृधः कस्यस्विद्धनम् इति। अज्ञानां जिजीविषूणां ज्ञाननिष्ठासम्भवे कुर्वन्नेवेह कर्माणि....

जिजीविषेत् इति कर्मनिष्ठोक्ता द्वितीयो वेदार्थः [5] इति भाष्य उक्तम्।
पुनश्चाचार्यशङ्करोऽन्धन्तमः प्रविशन्तीति मन्त्रे ज्ञानकर्मणोः पृथगेव फलमिति प्रतिपादयति। मन्त्र इत्थम्-

अन्धन्तमः प्रविशन्ति येऽविद्यामुपासते।
ततो भूय इव ते ये विद्यायां रताः॥[6]

मन्त्रेऽस्मिन् आचार्यशङ्करेण विद्येति पदस्यार्थः "देवतासम्बन्धिज्ञानं" इति कृतः। शङ्करो ब्रूते यद् देवतासम्बन्धिज्ञानेन देवलोकप्राप्तिर्भवति, मतमिदमुपनिषदपि द्रढयति- विद्यया देवलोकः, कर्मणा पितृलोकः[7] इत्येवं ज्ञानकर्मणोः पृथक्फलमिति। मतमिदं द्रढयितुमिमं मन्त्रमुपस्थाप्यते-

अन्यदेवाहुर्विद्ययाऽन्यद्द्वेवाहुरविद्यया।
इति शुश्रुम धीराणां ये नस्तद्व्याचचक्षिरे[8]॥

अत आचार्यशङ्करमते परमात्मज्ञानकर्मणोः सम्मुच्चयताऽसम्भवा। नैष्कर्म्यसिद्धावपि सुरे-श्वाराचार्योऽमुमेव सिद्धान्तं व्यवस्थापयति।
उपनिषत्सु परमात्मज्ञानप्राप्तिसाधनानि प्रोक्तान्यृषिभिः- तस्यै तपो दमः कर्मेति प्रतिष्ठा वेदाः सर्वाङ्गानि सत्यमायतनम् [9]। श्रीकृष्णोऽपि ज्ञानं प्रशंसते-

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति[10]॥

यद्यपि गीतायां तु ज्ञानकर्मणोरुभयोर्वर्णनं विद्यते तथापि ज्ञानकर्मणी स्वातन्त्र्येण विवेचिते। परञ्च सुरेश्वराचार्यमते ज्ञानकर्मणोर्ज्ञानमेव बलवदिति वक्ष्यतेऽग्रे। उपनिषत्सु ज्ञानेन द्वैतविनाशं भवतीति वर्णितम्-

यदातमस्तन्न दिवा न रात्रिर्न सन्न चासञ्छिव एव केवलः।
तदक्षरं तत्सवितुर्वरेण्यं प्रज्ञा च तस्मात्प्रसृता पुराणी॥ [11]

आचार्यशङ्करोऽप्यमुमेव सिद्धान्तं प्रस्तौति- कालत्रयेऽपि मुक्तौ प्रलयादौ च परमात्मा कूटस्थ इति निश्चयाज्जाग्रत्स्वप्नयोरपि भ्रान्त्या सद्वितीयत्वावभासः। [12] ज्ञानेन भगवत्प्राप्तिरिति-

स वृक्षकालाकृतिभिः परोऽन्यो यस्मात्प्रपञ्चः परिवर्ततेऽयम्।
धर्मावहं पापनुदं भगेशं ज्ञात्वात्मस्थममृतं विश्वधाम [13]॥

गीतायामप्यर्जुनः संशयापन्नस्तिष्ठति यत्ज्ञानकर्मणोः कतमं श्रेष्ठमिति-

ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन।
तत्किं कर्मणि घोरे मां नियोजयसि केशव [14]॥

पुनः श्रीकृष्णेन यावज्ज्ञानं निरूपितं तावदेव कर्मापि निरूपितम्-

न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः [15] ॥

तथा च-

नियतं कुरु कर्म त्वं ज्यायो ह्यकर्मणः।
शरीरयात्राऽपि च ते न प्रसिद्ध्येदकर्मणः [16]॥

इत्थं कर्मकरणाय चोदिताः प्रजा भगवता।
ज्ञानकर्मणोः सममेव फलमिति भगवत्कृष्णः-

यत्साङ्ख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते।
एकं साङ्ख्यं च योगं च यः पश्यति स पश्यति [17]॥

परञ्च नैष्कर्म्यसिद्धेः प्रथम अध्याये अद्वैतवेदान्तिमीमांसकयोर्ज्ञानकर्मणोः कतमं श्रेष्ठं, किञ्च मोक्षकारकमिति विषयमिधिकृत्य वादप्रतिवादाः सन्ति, ते च वादप्रतिवादा इत्थम्-
आदौ पूर्वमीमांसकमतानि-कर्मसम्मुचितज्ञानमेव मोक्षसाधनं ज्ञानमात्रं नेति पूर्वपक्षः-

कर्मणोऽङ्गाङ्गिभावेन स्वप्रधानतयाऽथवा।
सम्बन्धस्येह संसिद्धेर्ज्ञाने सत्यमप्यदोषतः॥ [18]

अर्थाद् ज्ञानं चेत्कर्मणोऽङ्गं स्यात् स्वतन्त्रं वा भवेत्, उभयथाऽपि ज्ञानकर्मसंश्लेषणेन मोक्षो भवति। ज्ञानमात्रेण न मोक्ष इति ज्ञानकर्मसम्मुचयवादी। अत्र पूर्वपक्षेण साधितं यत् वेदान्तसम्मतज्ञानमात्रेणैव मोक्षो न सिद्ध्यतीति यतो हि यावत्पर्यन्तं कर्म न क्रियते तावन्मोक्षो न भवति परञ्च तत्कर्मणा साकं ज्ञानमप्यपेक्षितम्। पुनश्च पूर्ववादिना प्रतिपाद्यते- अज्ञानजं कर्म चेदिति वेदान्तिमतं तन्न ज्ञानस्याप्यज्ञानजातत्वात् कर्मवत्। पूर्ववादी ब्रूते यत्-

नन्वात्मज्ञानमप्यात्मविद्योपादानं न हि
शास्त्रशिष्याचार्याद्यनुपादायाऽऽत्मज्ञानमात्मानं लभते[19]

अर्थाद् आत्मज्ञानोपादानकारणमविद्यैव शास्त्रशिष्याचार्यप्रभृतिभिरज्ञानेन वस्तु कल्पितम्, तस्मात्तज्ज्ञानमविद्याजातमेव, नेदृशं ज्ञानं मोक्षकारणं भवेत्। पुनश्च पूर्वपक्षेण प्रतिपाद्यते यत् कर्मै मुक्तौ साहय्याकं भवतीति-

तस्यैव दुःखतप्तस्य कथञ्चित् पुण्यशीलनात्।
नित्येहाक्षालितधियो वैराग्यं जायते हृदि॥ [20]

अर्थात् नित्यकर्माद्यनुष्ठानेन दुःखसन्तप्तजनस्य चित्तशुद्धिर्भवति तेन वैराग्यमुत्पद्यते, अतः कर्म मोक्षे हेतुः भवति। तथा च-

शुद्ध्यमानं तु तच्चित्तमीश्वरार्पितकर्मभिः।
वैराग्यं ब्रह्मलोकादौ व्यनक्त्यथ सुनिर्मलम्॥ [21]

आचार्यशङ्करेणाप्ययमेव सिद्धान्तः प्रतिपादितः-

चित्तस्य शुद्धये कर्म न तु वस्तूपलब्धये।
वस्तुसिद्धिर्विचारेण न किञ्चित् कर्मकोटिभिः॥ [22]

यदा साधको स्वनित्यनैमित्तिककर्माणीश्वरार्पितानि करोति तदा चित्तशुद्धौ सत्यां ब्रह्मलोकपर्यन्तं सकलवस्तूनि प्रति वैराग्यं साधक उद्भवति, अत पूर्वपक्षमन्तव्यमस्ति यत् कर्मणा मोक्षप्राप्तिरिति।
उपरोक्तसिद्धान्तैरेतत्साधितं यत् कर्मणा मोक्षप्राप्तिर्भवतीति राद्धान्तो दर्शनक्षेत्रे पूर्वमीमांसकानामिति। अधुनाऽद्वैतवेदान्तिना क्रमश उपरोक्तानां मतानां खण्डनं यथाप्रमाणं विधीयते- तत्र सुरेश्वराचार्येण प्रतिपाद्यते यत् कर्मणा न मुक्तिः साध्या, तत्र हेतुः-

प्रत्यक्प्रवणतां बुद्धेः कर्माण्युत्पाद्य शुद्धितः।
कृतार्थान्यस्तमायान्ति प्रावृडन्ते घना इव॥ [23]

तस्मान्मुमुक्षुभिः कार्यमात्मज्ञानाभिलाषिभिः।
नित्यं नैमित्तिकं कर्म सदैवाऽऽत्मशिद्ध्ये॥ [24]

अर्थात् कर्मणा बुद्धिशुद्धौ जातायां तत्कर्म तथैव निवर्तते यथा वर्षर्तोरन्ते मेघाः समाप्नुवन्ति, तस्मात् कर्म न मोक्षदमिति, पुनश्च बुद्धिशुद्धिः कर्ममहिमैव, आत्मज्ञानाभिलाषिभिस्तु अन्तःकरणविशुद्धये प्रयतनीयं सर्वदा। यतो हि ये तु योगपथ्यारूढास्तेषां कृते कर्मैव साधनम्, परञ्च ये तु योगपथि समर्थास्तेषां कृते तु कर्मत्याग एव साधनम्-

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते।
योगारूढस्य तस्यैव शमः करणमुच्यते॥ [25]

आचार्यशङ्करेणापि प्रतिपादितम्-

उद्धरेदात्मनाऽऽत्मानं मग्नं संसारवारिधौ।
योगारूढत्वमासाद्य सम्यग्दर्शननिष्ठया॥ [26]

पुनश्च पूर्वपक्षेण यज्ज्ञानकर्मणोरैक्यं प्रतिपादितमासीत्तत्खण्डनमप्युच्यते सुरेश्वराचार्येण-

बाध्यबाधकभावाच्च पञ्चास्योरणयोरिव।
एकदेशानवस्थानान्न समुच्चयता तयोः॥ [27]

यथा सिंहमेषयोर्नित्यविरोधत्वात्तयोरेकस्थानेऽवस्थितिरसम्भवा तथैव ज्ञानकर्मणोरपि बाध्यबाधकभावादेतयोर्युगपदवस्थितिरसम्भवा, यतो हि ज्ञानं कर्मबाधकमस्ति, कर्म च ज्ञानबाधकमेव। पूर्वपक्षेण यज्ज्ञानकर्मणोरङ्गाङ्गिभावसम्बन्ध उपस्थापितमासीत्तत्खण्डनमपीत्थम्-

सन्निपत्य न च ज्ञानं कर्माज्ञानं निरस्यति।
साध्यसाधनभावत्वादेककालानवस्थितेः॥ [28]

अर्थात् ज्ञानं कर्मणोऽङ्गीभूत्वा अविद्यानिवृत्तिकरणायाऽर्हं न, यतो हि कर्मान्तः- करणशु- द्धिद्वारा ज्ञानसाधनमेव भवति, तेन साध्यभूतज्ञानेन सह कर्मण एककालावस्थितिरसम्वैवेति। पुनश्चोत्तरपक्षेणोपस्थाप्यते यज्ज्ञानकर्मणोः समुच्चयोऽपि नैव युक्तम्-

अयथावस्त्वविद्या स्याद्विद्या तस्या विरिधिनी।
समुच्चयस्तयोरेव रविशार्वयोरिव॥ 29

अर्थादज्ञानं तु मिथ्यावस्तुपरकमेव, विद्या(ज्ञानम्) तु तद्विरोधिनी, तेन यथा सूर्याऽन्धकारयोः समुच्चयो न भवति तथैव ज्ञानाऽज्ञानयोरपि समुच्चयः कदापि भवितुं न शक्यते। सुरेश्वराचार्यः प्रतिपादयति यज्ज्ञानं तु सर्वेषां कृत एव भवति परञ्च कर्म न सर्वेषाम्-

बृहस्पतिसवे यद्वत् क्षत्रियो न प्रवर्तते।
ब्राह्मणत्वाद्यहंमानी विप्रो वा क्षात्रकर्मणि॥ 30

अर्थाद्यथा क्षत्रियस्य कृते बृहस्पतिनामकयागे प्रवृत्तिर्न भवति तथैव ब्राह्मणस्य कृते क्षत्रियनिमित्तराजसूयनामकयागे प्रवृत्तिर्न भवति, अतो कर्म न सर्वप्राणिसमर्थम्।अत ज्ञान-कर्मणोरस्मिन्विवादे सिद्धयति यत्कर्मणा मोक्षप्राप्तिर्न जायते ज्ञानेनैव मोक्षः सम्भवः, आचार्यशङ्करेणाप्ययमेव सिद्धान्तः प्रत्याद्यत-

न योगेन न साङ्ख्येन कर्मणा नो न विद्यया।
ब्रह्मात्मैकत्वबोधेन मोक्षः सिद्ध्यति नान्यथा॥ 31

सुरेश्वराचार्यः प्रतिपादयति यत् कर्मणाऽज्ञानमेवोत्पद्यते तेनाऽज्ञानेनाऽनात्मवस्तून्यात्मत्वा- ऽऽरोपो जायते तथा सति जीवः संसारवारिधौ निमज्जति सततम्-

मृत्स्नेभके यथेभत्वं शिशुरध्यस्य बल्गति।
अध्यस्याऽऽत्मनि देहादीन् मूढस्तद्वद्विचेष्टते॥ 32

अर्थाद्यथा अज्ञबालको मृन्निर्निर्मितक्रीडनके "अयं हस्ती" इति आरोपते तथैव अज्ञानसम्बद्धपुरुषोऽप्यनात्मदेहादिवस्तूष्वात्मत्वाऽऽरोपं करोति। तथा चाज्ञानिपुरुषः स्थाणौ चोरत्वाऽऽरोपेण बिभीते-

स्थाणुं चोरधियाऽऽलाय भीतो यद्वत्पलायते।
बुद्ध्यादिभिस्तथाऽऽत्मानं भ्रान्तोऽध्यारोप्य चेष्टते॥ 33

अत्र यथा साधकः सज्ज्ञानेन स्थाणुरयमित्येन जानीते तथैव आत्मतत्त्वज्ञाने सति कर्मकरणाय निमित्तो न भवति-

स्थाणोः सतत्त्वविज्ञानं यथा नाङ्गं पलायने।
आत्मनस्तत्त्वविज्ञानं तद्वन्नाङ्गं क्रियाविधौ॥ 34

**अत एव आचार्येण प्रतिपाद्यते-**

अतः सर्वाश्रमाणां तु वाङ्मनःकातकर्मभिः।
स्वनिष्ठितैर्न मुक्तिः स्याज्ज्ञानादेव हि सा यतः॥ 35

अतः सर्वाऽऽश्रमिणां मुक्तिर्वाणीमनोःशरीरकर्मभिर्भवितुं न शक्यते, तन्मुक्तिस्तु ज्ञानेनैव समर्थेति वेदान्तसिद्धान्तसिद्धिः॥ शमिति॥

**ग्रन्थसूची**


1. वेदान्तसारः, सदानन्दप्रणीतः
2. निरुक्तम् (पञ्चाध्यायी)
3. ईशावास्योपनिषद्, मन्त्रसंख्या-०१
4. तत्रैव, मन्त्रसंख्या-०२
5. ईशावास्योपनिषच्छाङ्करभाष्यम्.पृ०सं०२४
6. ईशावास्योपनिषद्, मन्त्रसंख्या-०३
7. बृहदारण्यकोपनिषद्, १.५.१६
8. ईशावास्योपनिषद्,१०
9. केनोपनिषद्,४.८
10. श्रीमद्भगवद्गीता,४.३८
11. श्वेताश्वतरोपनिषद्, ४.१८
12. श्वेताश्वतरोपनिषच्छाङ्करभाष्यम्, पृ०सं० २८३
13. श्वेताश्वतरोपनिषद्, ६.६
14. श्रीमद्भगवद्गीता, ३.१
15. तत्रैव, ३.५

16. तत्रैव, ३.८
17. श्रीमद्भगवगीता, ५.५
18. नैष्कर्म्यसिद्धिः, १.२०
19. तत्रैव, पृ०सं० १८
20. तत्रैव, १.४५
21. नैष्कर्म्यसिद्धिः, १.४७
22. विवेकचूडामणिः, १.११
23. नैष्कर्म्यसिद्धिः, १.४९
24. तत्रैव, १.५०
25. नैष्कर्म्यसिद्धिः, १.५१
26. विवेकचूडामणिः, १.९
27. नैष्कर्म्यसिद्धिः, १.५५
28. तत्रैव, १.५४
29. तत्रैव, १.५६
30. नैष्कर्म्यसिद्धिः, १.५७
31. विवेकचूडामणिः, १.५८
32. नैष्कर्म्यसिद्धिः, १.५९
33. तत्रैव, १.६०
34. नैष्कर्म्यसिद्धिः, १.६१
35. तत्रैव, १.९९